श्री किराताष्टकं

श्री किराताष्टकं

ॐ अस्य श्रीकिरातशस्तुर्महामंत्रस्य रेमंत ऋषिः देवी गायत्री छंदः श्री किरात शास्ता देवता, ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, श्री किरात शस्तु प्रसाद सिद्ध्यर्थे जपे विनियोगः |

करन्यासः

ॐ ह्रां अंगुष्ठाभ्यां नमः |

ॐ ह्रीं तर्जनीभ्यां नमः |

ॐ ह्रूं मध्यमाभ्यां नमः |

ॐ ह्रैं अनामिकाभ्यां नमः |

ॐ ह्रौं कनिष्ठिकाभ्यां नमः |

ॐ ह्रः करतल करपृष्ठाभ्यां नमः |

अंगन्यासः

ॐ ह्रां हृदयाय नमः |

ॐ ह्रीं शिरसे स्वाहा |

ॐ ह्रूं शिखायै वषट् |

ॐ ह्रैं कवचाय हुम् |

ॐ ह्रौं नेत्रत्रयाय वौषट् |

ॐ ह्रः अस्त्राय फट् |

भूर्भुवस्सुवरोमिति दिग्बंधः |

ध्यानम्:

ॐ कोदंडं सशरं भुजेन भुजगेंद्रभोगा भासावहन्
वामेनच्छुरिकां विभक्षलने पक्षेण दक्षेण च |
कांत्या निर्जित नीरदः पुरभिदः क्रीडन्किराताकृते
पुत्रोस्माकमनल्प निर्मलया च निर्मातु शर्मानिशम् | |

स्तोत्रं:

प्रत्यर्थिव्रातवक्षःस्थलरुधिरसुरापानमत्ता पृषत्कं
चापे संधाय तिष्ठन् हृदयसरसिजे मामके तापहं तम् |
पिंछोत्तंसः शरण्यः पशुपतितनयो नीरदाभः प्रसन्नो
देवः पायादपायाच्छबरवपुरसौ सावधानः सदा नः || 1 ||

आखेटाय वनेचरस्य गिरिजासक्तस्य शंभोः सुतः
त्रातुं यो भुवनं पुरा समजनि ख्यातः किराताकृतिः |
कोदंडक्षुरिकाधरो घनरवः पिंछावतंसोज्ज्वलः
स त्वं मामव सर्वदा रिपुगणत्रस्तं दयावारिधे || 2 ||

यो मां पीडयति प्रसह्य सततं देहीत्यनन्याश्रयं
भित्वा तस्य रिपोरुरः क्षुरिकया शाताग्रया दुर्मतेः |
देव त्वत्करपंकजोल्लसितया श्रीमन्किराताकृतेः
तत्प्राणान्वितरांतकाय भगवन् कालारिपुत्रांजसा || 3 ||

विद्धो मर्मसु दुर्वचोभिरसतां संतप्तशल्योपमैः
दृप्तानां द्विषतामशांतमनसां खिन्नोऽस्मि यावद्भृशम् |
तावत्त्वं क्षुरिकाशरासनधरश्चित्ते ममाविर्भवन्
स्वामिन् देव किरातरूप शमय प्रत्यर्थिगर्वं क्षणात् || 4 ||

हर्तुं वित्तमधर्मतो मम रताश्चोराश्च ये दुर्जना-
-स्तेषां मर्मसु ताडयाशु विशिखैस्त्वत्कार्मुकान्निःसृतैः ||

शास्तारं द्विषतां किरातवपुषं सर्वार्थदं त्वामृते
पश्याम्यत्र पुरारिपुत्र शरणं नान्यं प्रपन्नोऽम्यहम् || 5 ||

यक्षप्रेतपिशाचभूतनिवहा दुःखप्रदा भीषणाः
बाधंते नरशोणितोत्सुकधियो ये मां रिपुप्रेरिताः |
चापज्यानिनदैस्त्वमीश सकलान् संहृत्य दुष्टग्रहान्
गौरीशात्मज दैवतेश्वर किराताकार संरक्ष माम् || 6 ||

दोग्धुं ये निरतास्त्वमद्य पदपद्मैकांतभक्ताय मे
मायाच्छन्नकलेबराश्रुविषदानाद्यैः सदा कर्मभिः |
वश्यस्तंभनमारणादिकुशलप्रारंभदक्षानरीन्
दुष्टान् संहर देवदेव शबराकार त्रिलोकेश्वर || 7 ||

तन्वा वा मनसा गिरापि सततं दोषं चिकीर्षत्यलं
त्वत्पादप्रणतस्य निरपराधस्यापि ये मानवाः |
सर्वान् संहर तान् गिरीशसुत मे तापत्रयौघानपि
त्वामेकं शबराकृते भयहरं नाथं प्रपन्नोऽस्म्यहम् || 8 ||

क्लिष्टो राजभटैस्तदापि परिभूतोऽहं कुलैर्वैरिभिः
-श्चान्यैर्घोरतरैर्विपज्जलनिधौ मग्नोऽस्मि दुःखातुरम् |
हा हा किंकरवै विभो शबरवेषं त्वामभीष्टार्थदं
वंदेऽहं परदैवतं कुरु कृपानाथार्तबंधो मयि || 9 ||

स्तोत्रं यः प्रजपेत् प्रशांतकरणैर्नित्यं किराताष्टकं
स क्षिप्रं वशगान् करोति नृपतीनाबद्धवैरानपि |
संहृत्यात्मविरोधिनः खिलजनान् दुष्टग्रहानप्यसौ
यात्यंते यमदूतभीतिरहितो दिव्यां गतिं शाश्वतीम् || 10 ||

इति किराताष्टकम् संपूर्णं ||